भुज्युः, पुं, (भुज्यतेऽन्नेति । भुज भक्षणे + “भुजिम्टङ्भ्यां युक्त्युकौ ।” उणा० ३ । २१ । इति युक् ।) भाजनम् । इत्युणादिकोषः । २ । २०३ ॥ भाजनम् । (भुङ्क्ते सर्व्वानिति । भुज + कर्त्तरि, युक् ।) अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (स्वनामख्यातराजविशेषः । यथा, ऋग्वेदे । ४ । २७ । ४ ।

“ऋजिप्य ईमिन्द्रावतो न भुज्युं
श्येनो जभार वृहतो अधिष्णोः ॥”

भुनक्ति पालयतीति । भुज पालने + युक् । रक्षके, त्रि । यथा, ऋग्वेदे । ८ । २२ । २ ।
“पूर्व्वापुषं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्यम् ॥”
“ भुज्युं भुजपालने सर्व्वस्य रक्षकम् ॥” इति तद्भाष्ये सायनः ॥)

भुञ्जन्, [त्] त्रि, (भुज् + शतृ ।) भोगकर्त्ता । भुजधातोः शतृप्रत्ययनिष्पन्नोऽयम् ॥

भुञ्जानः, पुं, (भुज् + शानच् ।) भोगकर्त्ता । यथा,—
“भुञ्जानो वर्द्धयेत् पापमसत्यं संसदि ब्रुवन् ॥”
इति प्रायश्चित्ततत्त्वम् ॥
(तथा च ।
“अशितश्चोदकं युक्त्या भुञ्जानश्चान्तरा पिवेत् ॥”
इति सुश्रुते सूत्रस्थाने । ४६ अ, ॥)

भुरिक्, [ज्] स्त्री, (भरति सर्व्वं धरतीति । भृञ् + “भृञ उच ।” उणा० २ । ७२ । इति इजिः । धातोरुकारान्तादेशः ।) पृथिवी । इत्युणादिकोषः ॥ (द्विवचनान्तत्वे । बाहू । द्यावापृथिव्यौ च । यथा, ऋग्वेदे ।४ । २ । १४।

“रथं न क्रन्तो अपसा भुरिजो
ऋतं येमुः सुध्य आशुषाणाः ॥”

“भुरिजोः बिभ्रतः कर्म्मकरणसामर्थ्यं पदार्थान् वेति भुरिजौ बाहू तयोः । यद्वा, भुरिजोः देवान् मनुष्यांश्च बिभृत इति भुरिजौ द्यावापृथिव्यौ ।” इति तद्भाष्ये सायनः ॥)

भुवनं, क्ली, (भवन्त्यस्मिन् भूतानीति । भू + “भूसूधूभ्रस्जिभ्यश्छन्दसि ।” उणा० २ । ८० । इत्यत्र बहुलवचनाद्भाषायामपि प्रयुज्यते ।” इत्युज्ज्वलदत्तोक्त्या क्युन् ।) जगत् । (यथा, भट्टिः ।१।१।

“गुरुर्व्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत् स्वयम् ।”)

सलिलम् । गगनम् । जनः । इति मेदिनी । ने, १०२ ॥ चतुर्द्दशभुवनानि यथा,—

“चतुर्द्दशविधं ह्येतद् भूतसर्गं प्रकीर्त्तितम् ।
भूर्भुवः स्वर्महश्चैव जनश्च तप एव च ।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः ।
जम्बूः शाकः कुशः क्रौञ्चः शाल्मली मेदपुष्करः ।
सप्तद्वीपाः प्रधानानि ह्युपद्वीपैस्तु संयुताः ॥
लवणः क्षीरसंज्ञश्च घृतोदो दधिसंज्ञकः ।
सुरादेक्षुरसोदौ च स्वादूदः सप्तमो भवेत् ।
चत्वारः सागराः ख्याताः पुष्करिण्यश्च ताः स्मृताः ॥
उत्तराः कुरवो रम्यं वर्षं हैमवतं तथा ।
भद्राश्वं केतुमालञ्च तथा वर्षमिलावृतम् ॥
भारतं हरिवर्षञ्च तथा किंपुरुषावृतम् ।
एतान्यष्टौ तु वर्षाणि पुण्यानि कथितानि तु ॥
इन्द्रद्युम्नः कसेरुश्च ताम्रवर्णो गभस्तिमान् ।
नागवीथी तथा सौम्यो गन्धर्व्वो वारुणस्तथा ॥
सागराख्यस्तु नवमो भेदभारतवार्षिकः ।
इदन्तु भारतं वर्षं कर्म्मभूमिरिति स्मृतम् ॥
शेषाणि द्वीपवर्षाणि भोगस्थानानि सन्त्यपि ।
भागीरथी पावनी च ह्रदिनी ह्लादिनी तथा ॥
सीता वंक्षुश्च सिन्धुश्च सप्त गङ्गाः प्रकीर्त्तिताः ।
सुप्रभा काञ्चनी चैव विशाला सुमनोह्रदाः ॥
सरस्वत्योघनादा च सुवेणुर्विमलोदका ।
एता गङ्गास्तु विख्याताः सप्त पुण्यप्रदाः शुभाः ॥
हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः ।
श्वेतश्च शृङ्गवांश्चैरमाल्यवान् गन्धमादनः ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारिपात्रश्च कैलासो मन्दरस्तथा ॥
लोकालोको महांस्तेषु तथैवोत्तरमानसः ।
एते विंशतिर्विख्याताः पर्व्वतास्त्वशुषी वराः ॥
अतलं सुतलञ्चैव वितलञ्च गभस्तिमत् ।
महातलं रसातलं पातालं सप्तमं स्मृतम् ॥
रुक्मभौमं शिलाभौमं पातालं नीलमृत्तिकम् ।
रक्तपीतश्वेतकृष्णभौमानि च भवन्त्यपि ॥
पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम् ।
शुषिरं तानि कथ्यन्ते भुवनानि चतुर्द्दश ॥”
इति वह्निपुराणम् ॥

(भूतजातम् । यथा, ऋग्वेदे । १ । १५७ । ५ ।
“युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः ।”
तथा च वाजसनेयसंहितायाम् । ६ । ५ ।
“यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म्म साविषत् ॥” ॥ भावनम् । यथा, ऋग्वेदे । १० । ८८ । १ ।
“तस्य भर्म्मणे भुवनाय देवा धर्म्मणे कं स्वधया पप्रथन्त ॥” ॥ पुं, मुनिविशेषः । यथा, महाभारते । १३ । २६ । ८ ।
“नितम्भूर्भुवनो धौम्यः शतानन्दोऽकृतव्रणः ॥”)

भुवनको(श)ष, पुं, (भुवनस्य कोष इव ।) भूगोलः । (अस्य विवरणं श्रीभागवते पञ्चमस्कन्धे । १६ । १७ । १८ । अध्याये द्रष्टव्यम् ॥ तथाच ।

“जम्बुप्लक्षशाल्मलकुशक्रौञ्च-
शाकपुष्करसंज्ञाः सप्त द्वीपाः ।
लक्षयोजनप्रमाणाज्जम्बु-
द्वीपादुत्तरोत्तरद्विगुणाः ॥ १ ॥

लवणसुरासर्पिर्दधिदुग्धस्वच्छोदकसंज्ञैः परस्परद्विगुणैः ।
सप्तसमुद्रैर्वलयाकारैस्ते द्वीपाः परिवेष्टिताः ॥ योऽसौ मनुपुत्रः प्रियव्रतो नाम स सप्तद्वीपाधिपतिर्बभूव । तस्य अग्नीध्रादयो दश पुत्रा बभूवुः ॥३॥ त्रयः प्रव्रजिताः । शिष्टानां सप्तानां सप्त द्वीपाः पित्रा दत्ताः । तत्र जम्बुद्वीपाधिपतेराग्नीध्रस्य नव पुत्रा जाताः ॥४॥

नाभिः किंपुरुषश्चैव हरिवर्ष इलावृतः ।
रम्यो हिरण्मयश्चैव कुरुभद्रस्य केतुमान् ॥५॥

नववर्षाणि विभज्य पुत्रेभ्यः पित्रा दत्तानि वनं प्रविशता । अग्नीध्रोऽयं हिमाह्वयम् । यस्याधिपतिर्नाभिः ऋषभः पुत्रो बभूव ॥६॥ ऋषभाद्भरतो भरतेन चिरकालं धर्म्मेण पालितत्वादिदं भारतं वर्षमभूत् । इलावृतस्य मध्ये मेरुः सुवर्णमयश्चतुरशीतिसहस्राणि योजनानि तस्योच्छ्रायः । षोडशसहस्रमप्यधस्तादवगाढ़ः तद्द्विगुणो मूलविस्तारः ॥६॥ तन्मध्ये ब्रह्मणः पुरी । ऐन्द्र्यामिन्द्रस्य चामरावती । आग्नेय्यामग्नेस्तेजोवती । याम्यां यमस्य संयमनी । नैरृत्यां निरृतेर्भयंकरी । वारुण्यां वरुणस्य विश्वावती । वायव्यां वायोर्गन्धवती । उदीच्यां सोमस्य विभावरीति नववर्षान्वितं जम्बूद्वीपं पुण्यपर्वतैः पुण्यनदीभिरन्वितम् ॥७॥ किंपुरुषादीन्यष्टवर्षाणि पुण्यवतां भोगस्थानानि साक्षाद्भारतवर्षमेकं कर्मभूमिश्चातुर्वर्ण्ययुतम् ॥ ८ ॥

तत्रैव कर्म्मभिः स्वर्गं कृतैः प्राप्स्यन्ति मानवाः ।
मुक्तिश्चात्रैव निष्कामैः प्राप्यते ज्ञानकर्मभिः ॥६॥

अधोगतिमितो विप्र ! यान्ति वै पापकारिणः । ये पापकारिणस्तान् विद्धि पातालतले नरके कोटिसमन्वितान् ॥ १० ॥ अथ सप्तकुलपर्वताः कथ्यन्ते । माहेन्द्रः । मलयः शुक्तिमान् ऋष्यमूकः सह्यपर्वतः विन्ध्यः पारियात्रः । इत्येते भारते कुलपर्वताः ॥ ११ ॥ नर्मदासुरसाऋषिकुल्याभीमरथीकृष्णावेणीचन्द्रभागाताम्रपर्णी इत्येताः सप्त नद्यः गङ्गायमुनागोदावरीतुङ्गभद्राकावेरीसरयूरित्येता महानद्यः पापघ्नः ॥ १२ ॥

जम्बुनाम्ना च विख्यातं जम्बुद्वीपमिदं शुभम् ।
लक्षयोजनविस्तीर्णमिदं श्रेष्ठं तु भारतम् ॥१३॥

प्लक्षद्वीपादिपुण्या जनपदाः निष्कामा ये स्वधर्मेण नरसिंहं यजन्ति ते तत्र निवसन्ति अधिकारक्षयात् मुक्तिं च प्राप्नुवन्ति ॥१४॥ जम्बाद्याः स्वादूदकान्ताः सप्त पयोधयः । ततः परा हिरण्मयी भूमिः । ततो लोकालोकपर्वतः एष भूर्लोकः । १५ । अस्योपरि अन्तरिक्षलोकः खेचराणां रम्यस्तदूर्ध्वं स्वर्गलोकः ॥१६॥

स्वर्गस्थानं महापुण्यं प्रोच्यमानं निबोध मे ।
भारते कृतपुण्यानां देवानामपि चालयम् ॥१७॥
मध्ये पृथिव्यामद्रीन्द्रो भास्वान् मेरुर्हिरण्मयः ।
योजनानां सहस्राणि चतुरशीतिमुच्छ्रितः ॥१८॥
प्रविष्टः षोड़शाधस्ताद्धरण्यां धरणीधरः ।
तावत्प्रमाणा पृथिवी पर्व्वतस्य समन्ततः ॥ १९ ॥
तस्य शृङ्गत्रयं मूर्ध्नि स्वर्गो यत्र प्रतिष्ठितः ।
नानाद्रुमलताकीर्णं नानापुष्पोपशोभितम् ॥२०॥
मध्यमं पश्चिमं पूर्व्वं मेरोः शृङ्गाणि त्रीणि वै ।
मध्यमं स्फाटिकं शृङ्गं वैदूर्यमणिकामयम् ॥२१॥
इन्द्रनीलमयं पूर्व्वं माणिक्यं पश्चिमं स्मृतम् ।
योजनानां सहस्राणि नियुतानि चतुर्दश ॥२२॥
उच्छ्रितं मध्यमं शृङ्गं स्वर्गो यत्र त्रिविष्टपः ।
अप्रभान्तरितं शृङ्गं मूर्ध्नि छत्राकृतिस्थितम् ।